National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(39): 89-93
© 2021 NJHSR
www.sanskritarticle.com

**Bhageerathee Patra**
Lecturer in Sanskrit
Simulia Degree College,
Markona, Odisha

**Laxman Majhi**
Research Scholar ,
P.G. Dept. of Sanskrit ,
Utkal University , Vani Vihar,
Bhubaneswar, Odisha

**Correspondence:**
**Bhageerathee Patra**
Lecturer in Sanskrit
Simulia Degree College,
Markona, Odisha

# कृषिकर्मणि ज्योतिष: प्रभाव:

**Bhageerathee Patra, Laxman Majhi**

**शोधसंक्षिप्तिका –**

सृष्टिरियं कर्मफलाधीना। जीवितानां प्राणीनां पोषणाय संवर्धनाय च अहर्निशम् आहार: आवश्यक:। आहार: च अत्र मत: अन्नमेव जीवनस्य मूलं तच्च कृषिसाध्यम्। कृषिकर्मविषये यथा- कृषे: स्वरूपं, कर्षणं, वपनं, सेचनं, कृषिरक्षणं, भूमिच्छिद्रपिधानं, कृषिप्रवन्धनं सन्दर्भेषु संस्कृतवाङ्मये वहुषु शास्त्रेषु वर्णनं दृश्यन्ते। ज्योतिषानुसारं कथं कृषिकर्म करणीयम् इति एतस्य अध्ययनपरक: प्रयत्न: शोधपत्रेऽस्मिन् अभिप्रेत:।

**कुटशब्दा: - -** ऋतुकाल:, सौरपरिवार:, गर्भचक्रं, धान्यच्छेद:, आवर्तकमेघ: , धान्यस्थापनम्

**प्रस्तुताध्ययनस्य परिसर: प्रासङ्गिकता –**

मानवस्य जीवनधारणाय तथा वृत्त्यर्थं कृषि: सर्वदा अनिवार्यं भवति। प्राचीनकाले वृत्त्यर्थं कृषि: मूलं जीविका आसीत् । जना: प्राचीनं कृषिपद्धत्यनुसारं कृषिकार्यं कृतवन्त:। अनेन परिवेश: तथा पर्यावरणं शस्यश्यामला एवं सुरक्षितं च आसीत्। परन्तु अधुना एकविंशति: शतके आधुनिककृषिविज्ञाने जनानाङ आवश्यकतानुसारं कृषिद्रव्याणां वहुलं उत्पादनार्थं आधुनिकयन्त्रांशा: रासायनिकपदार्थानां प्रयोगेण परिवेश: तथा मृत्तिका दूषिता: भवति। अस्मात् कारणात् पर्यावरणे वहु: विश्रृङ्खला दृश्यते। अत: कृषे: रक्षणं तथा पर्यावरणस्यापि सुरक्षा साम्प्रतिके युगेऽस्मिन् अनिवार्या भवति। ज्योतिषानुसारं कृषिकार्यस्यारम्भ: उपरि गवेषणात्मकमध्ययनं नैव शक्यते।

**उपक्रम: –**

कृषिकर्मण: मूलं वृष्टि: वातोऽग्निश्चास्ति। वृष्टि: सेचनेन वात: प्राणनेन अग्निश्च पोषणेन दीपनेन च कृषिं समर्द्धयति। दिने सूर्यात् ऊष्माणां रात्रौ च चन्द्रमस: क्लेदं प्राप्य अहर्निशं वृद्धिं प्राप्य ऋतुप्रभावेण कालादि प्रभावेण च शस्यपाको भवति । औषधीनाम् उत्पत्तिस्थानं पृथिवी सौरपरिवारस्य प्रमुखसदस्य तया राजते, अत: पृथिव्या: प्रत्येकं घटनाया उपरि ज्योतिषां प्रभावोऽवश्यंभावी भवति । यानि ज्योतिषतत्त्वानि कृषिं प्रभावयन्ति तेषु ग्रहाराशिलग्नतिथिनक्षत्रमाससंवत्सरऋतुयोगअयना-दिगादीन प्रमुखानि सन्ति। एतेषां स्थिति: अन्तरिक्षे यथा भवति तथैव कृषिफलं प्राप्यते । नक्षत्रादीनां स्थित्यनुसारमेव वर्षादिकाल: निर्धार्यते। प्रावृड्वर्षाहेमन्तशिशिराश्च ऋतुकाला: औषध्यादिवृद्ध्यर्थं विशेषेण महत्त्वपूर्णा: भवन्ति। सर्वेषामपि औषधिवनस्पतीनां कृष्यर्थं भिन्नभिन्नकर्मणां कृते कृषिविज्ञानविशारदा: ज्योतिर्विदश्च तत्तदृतुषु नक्षत्रचक्रानुसारं राशिचक्रानुसारं च विविधयोगानां गणनां कृत्वा हिताहितमुपदिष्टवन्त:। संग्रहेण तेषामत्र दिङ्निर्देशमात्रं क्रियते।

**वर्षाज्ञाने ज्योतिषयोगा:**

**वृष्टिमूला कृषि: सर्वा वृष्टिमूलं च जीवनम्।**
**तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत्।।**[1]

इति पराशरस्य वचनानुसारेण कृषक: प्रथमं वृष्टिविषयकसवेहां नक्षत्रराशिलग्नादीनां ज्ञानं कुर्यात्। यतोहि सत्स्वपि युक्तिषु कृत्रिमोपायेषु च सर्वेषामपि जलानां मूलं वृष्टिरेव। जलं च कृषे: प्रथमा आवश्यकता। अत: प्रतिवत्सरं वर्षस्य राजा मन्त्रीमेघजलाढकादीनां च ज्ञानं भवेत् –

**अतो वत्सरराजानांमन्त्रिणं मेघमेव च।**
**आढकं सलिलस्यापि वृष्टिज्ञानाय शोधयेत्।।**[२]

उक्त ज्ञानाय गणनाविधे: निर्देशं कृत्वा पराशर: निर्दिशति यत् वर्षस्य राजा सूर्यो भवेत्तर्हि सामान्या वर्षा, चन्द्र: स्यात्तर्हि उग्रवर्षा मङ्गल: स्यात्तर्हि मन्दवर्षा भवति। वुधश्च वर्षराजा स्यात्तर्हि उत्तमवर्षा भवति –

**चित्तालार्के नृपे वृष्टिर्वृष्टिरुग्रा निशापतौ।**
**वृष्टिर्मन्दा सदा भौमे चन्द्रजे वृष्टिरुत्तमा॥**[३]

गुरुश्चेद् वर्षराज: स्यात्तर्हि शोभना वृष्टि: भवति। शुक्रे राज्ञिसति उत्तमवर्षा भवति। शनौ वर्षराजे सति पृथिवी रज: संयुक्ता भवति वर्षा च न जायते।[४] एवमेव एत्तद् ग्रहेषु वर्षराजेषु सत्सु विविधपरिणामा: जायन्ते। वराहमिहिरोऽपि प्रावृट्कालस्य ज्ञानं कृष्यर्थम् आवश्यकं मन्यते –

**अन्नं जगत: प्राणा: प्रावृट्कालस्य चान्नमयत्वम्।**
**यस्मादत: परीक्ष्य: प्रावृट्काल: प्रयत्नेन।।**[५]

गर्भलक्षणाध्याये वर्षाया: गर्भकालस्य उपदेशं कृत्वा तदनुसारं वर्षाया: काल: नक्षत्रराशिवेलामादीनामनुमानं निर्दिष्टम्। उल्लेखनीयमस्ति यद् आश्विनत: वैशाखपर्यन्तं सूर्य: स्वरश्मिभि: सर्वतो जलं गृह्णाति। ज्येष्ठत: भाद्रपदपर्यन्तं गर्भविमोकं करोति। एवम् अष्टमासान् गर्भमिव मेघेषु विवर्धमानं जलं काल आगते वर्षति। अत: समस्तं गर्भचक्रं ज्ञातव्यं। वराहमिहिरस्य मते कार्तिकशुक्लपूर्णिमानन्तरं वर्षागर्भकाल: परीक्ष्यते यतोहि सम्यक् गर्भाणां सम्भवेन शस्यसम्पत्तिर्जायते –

**शुक्लपक्षमतिक्रम्य कार्त्तिकस्य विचारयेत्।**
**गर्भाणां सम्भवं सम्यक् शस्यसम्पत्तिकारकम्।।**[६]

सिद्धसेनस्य मते मृगशिरसि शुक्लप्रतिपदानन्तरं यदा चन्द्रमा: पुर्वाषाढनक्षत्रे तिष्ठति तदा गर्भकालो विज्ञेय: इति बृहत्संहिताकार: उदाहरति–

**मार्गशिर: सितपक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढाम्।**
**पूर्वां वासमुपगते गर्भाणां लक्षणं ज्ञेयम्।।**[७]

ऋतुवशाद् गर्भलक्षणस्य ज्ञानार्थं वराहमिहिर: कानिचिद् भौतिकलक्षणानि निर्दिसति । तदनुसारं पौषमासे मार्गशीर्षे च यदा सन्ध्यारागयुक्ता: मेघा: दृश्यन्तां मार्गशीर्षे शीतं पौषे च हिमपातो भवति तदा वर्षागर्भोकालो ज्ञेय:। माघमासे प्रबलो वायु: तुषारश्च सूर्यचन्द्रमसो: निस्तेजस्त्वमतिशीतं सूर्योदये सूर्यास्तकाले च मेघा: भवन्तु तर्हि गर्भकालो ज्ञेय:। फाल्गुने रुक्षश्चण्डो वायु:। स्निग्धमेघा: सर्वत्र कपिलस्ताम्रे रवि: दृश्यतां तर्हि वर्षागर्भलक्षणं ज्ञेयम्। एवं सर्वेऽपि चैत्रे पवनघनवृष्टियुक्ता: गर्भा: वैशाखे च घनवायुजलविद्युत्स्तनिता: स्यु: तर्हि गर्भा: शुभा: भवन्ति।[८] यस्मिन् नक्षत्रे वर्षागर्भलक्षणं दृश्यते तत: पञ्चनवत्यधिकैकशतदिनानन्तरं प्रसूति: जायते । प्रसवकालश्च गर्भाद् विपरीतकाले दिशि च भवति।

पराशर: वर्षाकारकमेघानामावर्तकपुष्करद्रोणानां ज्ञानाय गणितं निर्दिश्य तेषां वर्षाप्रमाणं सूचयति –

**एकदेशेन चावर्त: संवर्त: सर्वतो जलम्।**
**पुष्करे दुष्करं वारि द्रोणे वहुजला मही।।**[९]

अर्थात् आवर्तकमेघा: एकदेशे वर्षन्ति संवर्तका: सर्वत्र वर्षन्ति पुष्करा अल्पजला: भवन्ति द्रोणाश्च वहुजलं वर्षन्ति। पराशर: प्रतिमासं वृष्टिज्ञानाय विविधलक्षान्युपदिश्य सद्योवृष्टिलक्षणानि निर्दिशति। एतेषु लक्षणेषु मण्डुकानां रव: बिल्वशयानां जान्तुनां पृथिवीगर्भाद् बहिरागमनं मयूराणां नर्तनं सर्पाणां वृक्षेष्वारोहणं दूहितवायुसञ्चार इत्यादि सद्योवर्षालक्षणानि ज्ञेयानि।[१०]

बृहत्संहितायां जलाढकस्य मानं वृष्टिपरिमाणस्य ज्ञानाय च कुण्डनिर्माणविधिं निर्दिश्य विविधनक्षत्रेषु वर्षाया मानं प्रोक्तम्। तदनुसारं हस्तप्रमाणे तद्वदेव च व्यासे हस्तप्रमाणगम्भीरे वर्तुलाकारे कुण्डे पञ्चाशत्पलम् आढकं वेति जलं भवति। एवं निरुपद्रवे नक्षत्रे सामान्यवर्षाकाले हस्तपूर्वाषाढायां मृगशिरसि चित्रायां रेवत्यां धनिष्ठायां च प्रवर्षणकाले षोडषद्रोणं वृष्टि: भवति शतभिषाज्येष्ठास्वातिषु चतु:द्रोणं कृतिकायां दशद्रोणं पूर्वफाल्गुन्यां पञ्चविंशति द्रोणं, पुनर्वसौ विंशति द्रोणम्, आश्लेषायां त्रयोदशद्रोणम् आश्विन्यां द्वादशद्रोणं आद्रायां च अष्टादशद्रोणं वर्षा वर्षा भवति।[११] वराहमिहिर: विविधनक्षत्रयोगानाम् उल्लेखं कृत्वा तत्तद्योगे वर्षाया: स्थिते: वर्णनं करोति। तदनुसारं शस्यार्थं विविधनक्षत्राणि प्रशस्तानि।

संग्रहशिरोमणिकार: जलज्ञानस्य सामान्यगणनाविधिम् एवं निर्दिशति यत् नक्षत्रतिथिवाराणां संख्यायोगे चतु: संख्यया विभाजनेन यदि एका संख्यावशिष्यते तर्हि जलं पाताले तिष्ठति द्वाभ्यां शेषे जलं स्वर्गे ज्ञेयं त्रिशून्येशेषे च पृथिव्यां जलं शस्यार्थं हितकरं भवति –

**नक्षत्रवारौ तिथिसम्प्रयुक्तौ**
**वेदाहृतं र्तणकेन कार्यम्।**
**एकावशिष्टे च जलं हि नागे**
**द्वाभ्यां च शेषे सलिलं च स्वर्गे।**
**त्रिशून्यशेषे भुवि संस्थितं च**
**भूसंस्थितं सुष्ठु वदन्ति विज्ञा:।।**[१२]

एवं वर्षाजलादिज्ञानाय ऋतुकालनक्षत्रादीनि विज्ञाय कृषिकर्मणि प्रवृत्त: उत्तमं फलं लभते। सर्वर्तुषु पूवभाद्रपदा उत्तरभाद्रपदा उत्तराषाढा रोहिणी चेति पञ्चनक्षत्रेषु पुष्ट: गर्भ: प्रचुरवृष्टिं करोति।

**भाद्रपदाद्वयविश्वाम्बुदेवपैतामहेष्वथाऋक्षेषु।**
**सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवति।।**[१३]

शतभिषा आश्लेषा आर्द्रा स्वाती मघा चेति नक्षत्रेषु उत्पन्नो गर्भः बहुदिनानि वर्षति।[१४] वराहमिहिरः वायुजलविद्युन्मेघनादसमेघ-प्रसव- इति प्रसवनिमित्तैः बहुवृष्टिं निर्दिश्य वृद्धगर्गस्य मतानुसारेण वृष्टिपरिमाणज्ञानस्य विधिं दर्शयति-

**वाते तु आढकं विद्यात् स्तनेति द्वादशाढकम्।**
**नवाढकं तथाभ्रेषु द्योतिते तु हडाढकम्।।**
**निमित्तपञ्चकोपेते द्रोणं वर्षति वासवः।।**[१५]

शस्यवृद्ध्यर्थं सविद्युतां सपांसु पक्षिरवैर्युक्तां रविचन्द्रपरीवेषां स्निग्धां नातिदूषितां वृष्टिं शुभां मत्वा स्निग्धान् संहतान् प्रदक्षिणगतिक्रियान् मेघान् सर्वशस्याभिवृद्धिंकरायाः वर्षायाः निमित्तभूतान् स्वीकरोति-

**यदा तु विद्युतः श्रेष्ठः शुभाशाः प्रत्युपस्थिताः**
**तदापि सर्वशस्यानां वृद्धिं ब्रुयाद्विचक्षणः।।**
**सपांसुवर्षाः सापश्च शुभा बालक्रिया अपि।**
**पक्षिणां सुस्वरा वाचः क्रीडापांशुजलादिषु।।**
**रविचन्द्रपरिवेषाः स्निग्धाः नात्यन्तदूषिताः।**
**वृष्टिस्तदापि विज्ञेया सर्वशस्यार्थ साधिका।।**
**मेघाः स्निग्धाः संहताश्च प्रदक्षिणगतिक्रिया।**
**तदा स्यान्महती वृष्टिः सर्वशस्याभिवृद्धये।।**[१६]

वृहत्संहितायां शस्यवृद्धिकरेषु योगेषु रोहिणीयोगः स्वातीयोगः अन्ये योगाश्च निर्दिष्टाः। तत्र रोहिणीयोगस्य विविधस्थित्यनुसारं तत्तत्फलनिर्देशं कुर्वन् वराहमिहिरः कथयति यत् चन्द्रश्चेद् रोहिण्याः ईशानकोणे स्थितः स्यात्तर्हि सुवृष्टिर्भवति धान्यानां मूल्ये च न्यूनता भवति।[१७] स्वातीयोगे विविधफलानामुल्लेखं करोति। तदनुसारं स्वातीयोगे अहर्निशं वर्षा भवति चेत्तर्हि वर्षाकाले निर्दोषवृष्टिः ज्ञेया। तृतीये भागे स्वातीयोगवर्षणात् ग्रैष्मधान्यानां वृद्धिः शारदानां च नाशः विज्ञेय इति गर्गस्य मतम्।[१८] आषाढशुक्लपूर्णिमायां वायव्य कोणे सन्ध्यायां वातेन सर्वधान्यनां वृद्धिः विज्ञेया।[१९]

**ज्योतिषानुसारं कृष्यारम्भः -**

कृषिकर्मण आरम्भः कर्षणाद्भवति। तदेव हि प्रथमं भुवं विदार्य तां कृषियोग्यां करोति। संग्रहशिरोमणिकारः चन्द्रशुक्रयोः बलिनोः सूर्यमङ्गलशनिषु निर्बलेषु मकरराश्याश्रति चन्द्रमसि गुरौ लग्ने कृषिकार्यमुत्तमं मन्यते –

**शक्तिशालिनि सितेऽथशीतगौ दुर्बलैरसितभौमभास्करे।**
**आश्रते शशिनि वारिजोदये लग्नविवर्तिनि गुरौ कृषिक्रिया।।**[२०]

हलप्रसारणारम्भास्यार्थं मृगशिरा-चित्रा-अनुराधारेवती-उत्तरा-हस्ता-अश्विनी-पुष्यस्वाती-पुनर्वसु-श्रवणा-धनिष्ठा-शतभिशामूलाम-घा विशाखा च प्रश्नस्यनक्षत्राणि उक्तानि –

**मृदुध्रुवक्षिप्रचरेषु मूलमघाविशाखासहितेषु भेषु ।**
**हलप्रवाहं प्रथमं विदध्यान्नीरोगमुष्कान्वितसौरभेयैः।।**[२१]

**अनिलोत्तररोहिण्यां मृगमूलपुनर्वसौ।**
**पुष्यश्रवणहस्तासु कुर्याद् हलप्रसारणम्।।**[२२]

पराशरः शस्यवृद्धये शुक्रसोमगुरुवासरेषु विशेषतश्च बुधवासरे हलप्रसारणं शुभं मन्यते । भौमरविशनिवासरे च हलप्रसारणं शुभ न मन्यते। तद् हि राज्योपद्रवाय भवति।

**हलप्रवहणं कार्यं कृषकैः शस्यवृद्धये।**
**शुक्रेन्दुजीववारेषु शशिजस्य विशेषतः।।**
**भौमार्कदिवसेषु चैव तथा च शनिवासरे**
**कृषिकर्मसमारम्भो राज्योपद्रवमादिशेत्।।**[२३]

कर्षणारम्भार्थं तिथिनां शुभाशुभफलं निर्दिश्य पराशरः तदर्थं दशमी एकादशी द्वितीया पञ्चमी त्रयोदशी सप्तमी चेति तिथिः शुभाः मन्यते।[२४] वृषे मीने कन्यायां मिथुनौ धनौ वृश्चिके च लग्नेषु हलप्रसारणं शुभं भवति –

**वृषे मीने च कन्यायां युग्मे धनुषि वृश्चिके।**
**एतेषु शुभलग्नेषु कुर्यात् हलप्रसारणम्।।**[२५]

रत्नमालाकारोऽश्विनीमृगशिरःपुनर्वसुज्येष्ठाहस्तरेवती-अनुराधा-स्वाती-चित्रा-चेति नक्षत्राणि तिर्यङ्मुखानि इति मत्वा एतेषु हलप्रवहणं शुभं मन्यते। अन्यान्यपि विविधानि शुभाशुभफलानि पराशरेणोक्तानि ।

**ज्योतिषानुसारम् अन्यकृषिकर्माणि -**

विविधैः ज्यतिर्विदैः बीजोप्ति-आरोपण-शस्यारोहण-सेचन-धान्यच्छेदन-कणमर्दन-कट्टन - धान्यनयन - बीजसंग्रहादिकृषिकर्मणां सम्पादनाय तत्तत् - तिथिवारनक्षत्रराशिलग्नानां हिताहितं पातिपादितम्। तेषां दिङ्निर्देशोऽत्र क्रियते।

**ज्योतिषानुसारं बीजोप्तिकालः -**

संग्रहशिरोमणौ हस्ताश्विपुष्योत्तररोहिणीनक्षत्रेषु चित्रानुराधामृग-शिरः रेवतीस्वातिधनिष्ठामघामूलेषु च बीजोप्तिः शुभा मता –

**हस्ताश्विपुष्योत्तररोहिणीषु चित्रानुराधामृगरेवतीषु।**
**स्वातौ धनिष्ठा च मघा मूलं बीजोप्तिरुत्कृष्टफला प्रदिष्टा।।**[२६]

पराशरः सामान्यतः वैशाखे वपनं श्रेष्ठं ज्येष्ठे मध्यमम् आषाढे चाधमं मन्यते।[२७] उत्तरात्रयमूलज्येष्ठाऽनुराधामघामृगशिरः रोहिणीहस्त-रेवतीषु वपनमुत्तमं भवतीति पराशरस्य मतम्।[२८] श्रवणपूर्वात्रय-विशाखाभरण्याद्रास्वात्याश्लेषासु बीजवपनेन बीजमात्रं प्राप्यते।[२९] पराशरः ज्येष्ठमासान्ते आषाढस्य आरम्भिके दिनत्रये रजस्वलायां सति भूमौ बीजवपनं निषिद्धं मन्यते।[३०] संग्रहशिरोमणिका-रस्तुआर्द्रानक्षत्रस्य प्रथमचरणे सूर्ये प्रविष्टे दिनत्रयं भूमिं रजस्वलां मत्वा तस्मिन् काले बीजवपनं निषिद्धं मन्यते।चतुर्थीनवमी चतुर्द्दशी अष्टमी पूर्णिमा चेति तिथयः भद्राः क्षीणचन्द्रः रात्रिः सन्ध्याद्वयं चेति बीजवपनार्थमनिष्टकरमिति संग्रहशिरोमणिकारः।

**रवौ रौद्राद्यपादस्थे भूमेः सञ्जायतेर्जः।**
**तस्माद् दिनत्रयं तत्तु बीजवापे परित्यजेत्।।**

**रिक्ताष्टमीविष्टिषु नष्टचन्द्रे क्षीणेन्दुरारर्कजवासरेषु।**
**दिनक्षये वा निशि सन्ध्ययोर्वा कृता कृषी पूर्वधनानि हन्ति।।**[३१]

**ज्योतिषानुसारं शस्याङ्कुरारोपणम् -**

शाल्यादीनां शस्यानामङ्कुरारोपणार्थं हस्तत्तरात्रयमूलधनिष्ठा-रोहिणी मृगपुष्याश्विन्यनुराधामघाश्चेति नक्षत्राणि शुभानि। रिक्ता तिथी: शनिभौमवासरौ च अङ्कुररोपणार्थं निषिद्धा: -

**हस्तत्रयोत्तरामूले धनिष्ठारोहिणीमृगे।**
**पुष्येऽशिवन्युनुराधायां मघायां शुभवासरे।।**
**त्यक्त्वा रिक्ता: शनिं भौमं शस्यस्याङ्कुररोपणम्।।**[३२]

पराशर: ऋत्वनुसारं रोपणविधे: उपदेशं कुर्वन् निर्दिशति यत् कर्कटे (श्रावणे) हस्तान्तरे, सिंहे (भाद्रपदे) अर्धहस्तान्तरे, कन्यायां (अश्विने) चतुरङ्गुलान्तरे रोपणं कुर्यात् –

**हस्तान्तरे कर्कटे च सिंहे हस्तार्द्धमेव च।**
**रोपणं सर्वशस्यानां कन्यायां चतुरङ्गुलम्।।**[३३]

**ज्योतिषानुसारं धान्यकट्टनम् -**

बीजानामङ्कुरोत्पत्तिकाले सर्वत्र तृणादिकानि जायन्ते। तेषामपसारणं कट्टनमुच्यते। तेषामपसारणं कट्टनमुच्यते। पराशर आषाढे श्रावणे च धान्यकट्टनं हितकरं मन्यते यतोहि यस्य शाल्यादिधान्यस्य कट्टनं न क्रियते तस्य पादपां अपुष्टा: भवन्ति बीजं च विवृद्धिं न लभते ।

**आषाढे श्रावणे मासि धान्यमाकट्टयेत् बुध:।**
**अनाकट्टं तु यद् धान्यं यथा बीजं तथैव हि।।**[३४]

**ज्योतिषानुसारं सेचनयोग: -**

संग्रहशिरोमणौ शस्यारोपणकाले रविबुधमघाहस्तान् विहाय शेषे यथापेक्षितकाले सेचनं हितमुक्तम् –

**शस्यारोपोदिते काले हित्वा ज्ञार्कमघाकरम्।**
**वृक्षशस्यलतादीनां प्रशस्तं जलसेचनम्।।**[३५]

**ज्योतिषानुसारं धान्यच्छेदन: -**

आर्द्रामघामृगशिराहस्तपुष्यस्वातीश्रवणमूलधनिष्ठासु नक्षत्रेषु गुरुशुक्रवारयो: रिक्ततिथिं विहाय भौमं च विहाय धान्यच्छेद: प्रशस्यो मत: ।

**रौद्र पित्र्ये तथा सौम्ये हस्ते पुष्येऽनिले तथा।**
**शस्यच्छेदं प्रशंसन्ति मूलश्रवणवासवे।**
**गुरौ शुक्रे शुभं हित्वा रिक्तां भौमशनैश्चरौ।।**[३६]

**ज्योतिषानुसारं कणमर्दनम् -**

संग्रहशिरोमणौ अनुराधाश्रवणमूलरेवतीमघात्रये ज्येष्ठायां रोहिण्यां च कणमर्दनं शुभमुक्तम् –

**अनुराधाश्रवणे मूले रेवत्यां च मघात्रिभे ।**
**ज्येष्ठायां चैव रोहिण्यां शुभं स्यात्कणमर्दनम्।।**[३७]

**ज्योतिषानुसारं धान्यनयनं स्थापनञ्च –**

खलभूमे: धान्यनयनार्थं रोपणोदितनक्षत्रे शनिभौमवासरयो: अन्नस्यानयनं पुष्पफलाद्योत्तारणं शुभं मन्यते।[३८] कोष्ठादौ धान्यस्थापनार्थं च मृगशिरशि अनुराधायां श्रवणे नक्षेत्रे गुरुशुक्रविसोमवासरेषु च प्रशस्यते इति संग्रहशिरोमणिकार:।[३९] हस्ते श्रवणे धनिष्ठायां मृगशिरसि शतभिशायां पुष्ये रेवत्यां रोहिण्यां भरण्यां मूले उत्तरात्रये मघायां पुनर्वसौ इत्येतेषु नक्षत्रेषु गुरुशुक्रसोमवासरेषु, मीनलग्नगते सूर्ये अन्येषु च शुभनक्षत्रेषु धान्यस्थापनं कर्तव्यमिति पराशर:। रविवासर: धान्यस्थापनार्थं पराशरेण नेष्यते।[४०]

**ज्योतिषानुसारं बीजसंग्रह: -**

बीजसंग्रहार्थं संग्रहशिरोमणिकार: हस्तत्रयं पुनर्वसू रोहिणीं श्रवणद्वयं स्थिरलग्नं शुभं वारं क्षीनचन्द्रञ्च कालं प्रशस्यं मन्यते –

**हस्तत्रये च पुनर्वस्वो: रोहिण्यां श्रवणद्वये।**
**स्थिरे लग्ने शुभे वारे विचन्द्रे बीजसंग्रह:।।**[४१]

रत्नमालाकार: कुम्भलग्ने बीजसंग्रहमुप्तिं च प्रशस्तं मन्यते –

**बीजसंग्रहणोप्ती च कर्तव्ये कलशोदये।**[४२]

**उपसंहार: -**

एवं प्राय: सर्वेषामपि कृषिकर्मणां कृते शुभाशुभनक्षत्रलग्नवारादीनां विवेचनं प्राप्यते। कृषका: पारम्पर्येण तत्तद् योगान् देशाचारानुसारं विचार्य कृषिकर्माणि कुर्वन्ति इति लोकव्यवहार: प्रचलित:। सावनकालानुसारेण चान्द्रकालानुसारेण चानुकूलदैवयोगं प्राप्य शस्यानां सर्वथा लोकहितार्थं वृद्धि: भवति इति कृषिविचक्षणानां ज्योतिर्विदां च मति:। बृहत्संहिताया: द्रव्यनिश्चयाध्याये विविधधान्यानां स्वामीराशे: कथनं प्राप्यते। तदनुसारेण मसूरगोधू-मरालकयवानां स्थलभवानां चौषधीनां स्वामी मेष: घोधूमपुष्पशालिधान्ययवानां स्वामी मिथुन: कोरदूषकदलीपत्राणां स्वामी कर्क:, तुषधान्यानां स्वामी स्वामी कन्या मसूरयवगोधूम-सर्षपाणां स्वामी तुला, तिलधान्यमूलोद्भवधान्यानां स्वामी धनु:, वृक्षगुल्मलतादीनां सैक्यफलानामिक्षूणां च स्वामी मकरो अस्ति।[४३] सम्बन्धितराश्यनुसारं शुभाशुभं विचार्य विविधाधान्यानां कृषि: कर्तव्या इत्यभिप्राय:।

**सन्दर्भग्रन्थसूची: -**


१.संस्कृतवाङ्मये कृषिविज्ञानम् , डा. नवलता, नागपब्लिशर्स, दिल्ली, ११०००७

२.कृषिपराशर:, अनुवादक: सम्पादकश्च श्री द्वारिका प्रसादशास्त्री , चौखम्बा संस्कृत सीरीज,

३.काश्यपीयकृषिसूक्ति , प्रकाशक: एशियान एग्रीहिस्ट्री फाउण्डेसन्, सिकन्दरवाद्

४.बृहत्संहिता, पण्डित अच्युतानन्द झा , चैखम्बाविद्याभवन, वारणासी, २०११

**टिप्पणी –**

१.कृषिपराशरः,१०.
२.कृषिपराशरः,११.
३.कृषिपराशरः,१३.
४. कृषिपराशरः,१४.
५.बृहत्संहिता-गर्भलक्षणाध्यायः, १.
६.बृहत्संहिता-गर्भलक्षणाध्यायः, ६
७.बृहत्संहिता-गर्भलक्षणाध्यायः, ६
८.बृहत्संहिता-गर्भलक्षणाध्यायः, १९-२२.
९.कृषिपराशरः,२५.
१०. कृषिपराशरः,६५-७०.
११. बृहत्संहिता-प्रवर्षणाध्यायः,६-९.
१२. संग्रहशिरोमणिः,११.१३०.
१३. बृहत्संहिता-गर्भलक्षणाध्यायः,२८.
१४. बृहत्संहिता-गर्भलक्षणाध्यायः, २९.
१५. बृहत्संहिता-गर्भलक्षणाध्यायः,३०-३१.
१६. बृहत्संहिता-गर्भलक्षणाध्यायः,५-८.
१७. बृहत्संहिता-प्रवर्षणाध्यायः,३३.
१८. बृहत्संहिता-स्वातियोगाध्यायः,४.
१९. बृहत्संहिता-स्वातियोगाध्यायः,६.
२०. संग्रहशिरोमणिः,११.१७४.
२१. संग्रहशिरोमणिः,११.१७२.
२२. कृषिपराशरः,१२१.
२३. कृषिपराशरः,१२२-१२३.
२४. कृषिपराशरः,१२४.
२५. कृषिपराशरः,१२७.
२६. संग्रहशिरोमणिः,१७७.
२७. कृषिपराशरः,१६८.
२८. कृषिपराशरः,१७०.
२९. कृषिपराशरः,१७१.
३०. कृषिपराशरः,१७५.
३१. संग्रहशिरोमणिः,११.१७९-१८०.
३२. संग्रहशिरोमणि,११.१८३.
३३. कृषिपराशरः,१८५.
३४. कृषिपराशरः,१८६.
३५. संग्रहशिरोमणिः,११.१८४.
३६. संग्रहशिरोमणिः,११.१८५.
३७. संग्रहशिरोमणिः,११.१८६.
३८. संग्रहशिरोमणिः,११.१८७.
३९. संग्रहशिरोमणिः,११.१९७
४०. कृषिपराशरः,२४१-२४२.
४१. संग्रहशिरोमणिः,११.१६९.
४२. रत्नमाला लग्नकृत्य १०.२२.
४३. बृहत्संहिता-द्रव्यनिश्चयाध्यायः,२-५.